International Journal of Sanskrit Research 2022; 8(4): 152-154

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2022; 8(4): 152-154
© 2022 IJSR
www.anantaajournal.com
Received: 16-04-2022
Accepted: 05-06-2022

**डॉ. मुल्लपूडि बि एस् एस् नारायण**
श्री सत्यसायी इन्टिट्यूट् आफ् हय्यर् लॅर्निंग्, आंध्र प्रदेश, भारत

**Corresponding Author:**
**डॉ. मुल्लपूडि बि एस् एस् नारायण**
श्री सत्यसायी इन्टिट्यूट् आफ् हय्यर् लॅर्निंग्, आंध्र प्रदेश, भारत

# धर्मराजस्य पात्रचित्रणम्-विराटपर्वम्

**डॉ. मुल्लपूडि बि एस् एस् नारायण**

## प्रस्तावना

व्यासाय विष्णु रूपाय व्यासरूपाय विष्णवे।
नमो वै ब्रह्मनिधये वासिष्ठाय नमो नमः।।

महाभारते दृश्यमानानां तत्तत् विशिष्ट्यव्यक्तीनां अनुशीलने धर्मराजस्य औन्नत्यं अनुपदम् आश्चर्यानंदप्रदं परिस्फुरते। यद्यपि भगवान् वासुदेवः अत्र कीर्तितः तथाऽपि मानवपात्रेषु मुख्यतमः धर्मजः। दैविकी श्क्तिः तं तादृशं महिमान्वितं चकार।

पुण्यश्लोको नलो राजा पुण्यश्लोको युधिष्ठिरः।
पुण्यश्लोका च वैदेही पुण्यश्लोको जनार्थनः।।

इति व्यासवचनं धर्मजस्य नलतुल्यत्वं, जनार्थनतुल्यत्वं च साधयति।
विराटदेशप्रवेशात् पूर्वमेव अनुयायिम्, परिवारवर्गं विसृज्य धौम्यप्रबोधित दासधर्माः, जय, जयन्त, विजय, जयत्सेन, जयद्बल इति निजसंकेत नामधेयाः, (गुह्यानि नामानि) चक्रे तेषां युधिष्ठिरः।

जयो जयन्तो विजयो जयत्सेनो जयद्बलः।
इति गुह्यानि नामानि चक्रे तेषां युधिष्ठिरः।। श्लो5.35

नगरबहिस्समीपप्रेतभूमौ महाशमीकोटरान्तरे रक्षितनिजायुधाः विराटनगरं प्रविविशुः। प्रवेशद्वारसमीपे आलयं दृष्ट्वा त्रिभुवनमातरं दुर्गां धर्मजः एवम् अस्तौत्।
यशोदा गर्भसम्भूताम् नारायण वरप्रियाम् देवी ,इत्यारब्धे अस्मिन् स्तोत्रे कृष्णसोदरी ... महिषासुरमर्थिनीं बन्धमोहिनीं मूर्ध्ना प्रणम्य ,कौमारव्रतदीक्षिभिः पूजितां

"देवी त्वामहं शरणं प्रपन्नोस्मि"

इति प्रार्थितवान्। तद्वचनैः प्रीता दुर्गा अज्ञातवासान्ते पाण्डवैः प्रार्थ्यमानविजयप्राप्तिं वरं प्रादात्। वनवासान्ते यमानुग्रहः अनुसरति अयम् दर्गानुग्रहः।
विराटस्थाने कङ्कभट्ट नाम्ना प्रविष्टो धर्मजः पुनरेकवारं ब्राह्मणत्वेन दृश्यते। तत्तेजो विस्मितः राजा तं आत्मतुल्यं सभ्यजनेषु प्राकटयत्।

तदनन्तरं क्रमेण शेषाः पाण्डवाः सैरन्ध्रीनाम्नी कुन्ती च स्वस्व वृत्तिषु प्रविष्टा आसन्। एवं दशमासाः सुलभं याताः। एकादशमासे राजश्यालः कीचकः मर्तुकाम इव/कालाभिपन्न इव विराटराजमन्दिरं प्राप। शताधिकसोदरः कीचकः दैत्याम्शसम्भूतैः महाबलयुतश्च व्यासः उपवर्णितवान्। कतिचित् दिनानन्तरं सैरन्ध्री तस्य दृष्टिपथं गता। दुश्शीलेन कीचकेन सभामध्ये धर्मजवृकोदरयोः पुरतः अवमानिता सैरन्ध्री तत् पूर्वमेव प्राप्त सूर्यानुग्रहा तन्नियुक्तराक्षसप्रभावेण संरक्षिता च आसीत्। कोपाग्नी प्रभादूषितं वृकोदरं सरहस्यं सान्त्वयामास धर्मजः। "अयि वल्लव! पाक कर्मणि उपयुक्त दारुकृतेन छायाप्रदं, अस्मदुपकारकं वृक्षं मा विनाशय"

आलोकयसि किम् वृक्षं सूद दारुकृतेन वै।
यदि ते दारुभिः कृत्यं बहिर् वृक्षान्निगृह्यताम्।। 16.19श्लो

इति वचनैः नाऽस्य कीचकस्य सभायाम् संहननं युक्तं, बहिः सभा भिन्नप्रदेशे सपरिवारं (वृक्षान् इति बहुवचन स्वारस्यं) एनं ध्वंसय समूलम् इति धर्मजस्य सङ्केतवचनं, रहस्यपालनं सूचयति। तत्रापि आश्रयप्रदातुः विराटस्य गौरवं सभामध्ये नैव अस्माभिः हातव्यम्।
तत्रैव, "तव भर्तारः गन्धर्वाः वर्तन्ते.. इति वदसि किल, ते एव योग्ये समये त्वां रक्षन्ति हि। सर्वं विविच्य शान्तचित्ता अन्तःपुरम् गच्छ। भवन्नियोगं पालय। " इति धर्मजः सैरन्ध्री समयपालनपरां कुर्वन् प्रेषयामास। एवं शत्रुकृत भार्यावमानोद्विग्नं भीमं दुष्ट अवमानितां सतीं सैरन्ध्रीं च प्रशमनेन धर्मजस्य समयपालनम् औचित्यनैपुण्यम् अतिवेलम् अत्र दृश्यते। यमाद्यनुग्रहप्राप्त अज्ञातवास रक्षणोऽपि स्वकृतदोषाभावे एव तद्वराणां फलप्रदायकत्वं इति तस्य आशयः।
चरेभ्यः प्राप्त कीचकोपकीचकवधवृत्तान्तः सुयोधनः विराटराज्ये पाण्डवस्थितिं साशंकम् अनुमीय, निश्चयक्षानार्थं सभास्थितान् पप्रच्छ। तत्र द्रोणः पाण्डवानां धर्मरक्षितत्वं, तेन च अविनाशित्वम्, अभ्यूह्य यत्किंचित् वदति। अनन्तरं भीष्मस्तु धर्मजस्य उत्तमपुरुषत्वं, अनन्वेष्यत्वं, धर्मरक्षितत्वं प्रशंसयति।
"अयि सुयोधन! मद्वचनं तेषां पाण्डवानां द्रोहकरं मास्तु। किन्तु सत्यं वदामि। पाण्डवोत्तमः महात्मा धर्मजः यत्र वर्तते तत्रत्याः जनाः पञ्चभूताश्च, पशवश्च धर्मपराः, धर्म अनुप्राणिता एव सम्लक्ष्यन्ते।

दानशीलो वदान्यश्च निभृता ह्रीनिषेवकः।
जनो जनपदे भाव्यो यत्र राजा युधिष्ठिरः।। 28.15श्लो

धर्मरक्षितं तं सद्विजाः पण्डिता अपि नैव जाने ते। सामान्य चराः तदन्वेषणे ज्ञाने च कथं शक्ता भवेयुः?

तन्निवसतः राज्ये गवां समृद्धिः अपारं सम्दृश्यते। इतोप्यधिकं किं वक्तव्यम्? इत्युक्तं गांगेयवचनम् तस्य धैर्यं धर्मजमहत्वविषये निर्भीकत्वं प्रत्यक्षी करोति। किन्तु एतद् गाङ्गेयवचनं पाण्डवविनाशैक बुद्धिम् सुयोधनम् उत्तरगोग्रहणे समुद्योगिनं चकार इति न विस्मर्तव्यम्।
दक्षिणगोग्रहणसमये ब्राह्मण वेषच्छन्नोऽपि धर्मजः नैजं क्षत्रियत्वम्, अविस्मृत्य अहमपि गोधनरक्षणार्थं युद्धगामी भवामि इति स्वयं प्रस्थितवान्। अस्मत् सैन्येन साकं मल्लहन्तबाहुबलशाली अस्मत् वल्लवः एवं अश्वपालक गोपालकौ तन्त्रीपालक दामग्रन्धिनामकौ अधिकारिणौ च युद्धसन्नद्धौ भवेताम् इति धर्मजः विराटम् उपदिदेश। तत्रापि प्रतिक्षणं निजसमयपालनरक्षणातत्परः धर्मसूतिः भीमं "वृक्षादीन् उन्मील्य अमानवं युद्धं मा प्रदर्शय, किन्तु आयुधैरेव त्वया त्रिगर्तसैन्यं हन्तव्यम्" इति सरहस्यं प्रतिबोधयति।
धर्मजस्य युद्धनैपुण्यम् अस्मिन् गोग्रहणघट्टे सुशर्मणाबद्धं विराटं भीमो विमोच्य तं च शत्रुं बन्धयित्वा अग्रजाय प्रादर्शयत्। धर्मसूतिः नैजं धर्मजत्वं निरूपयन् प्राणरक्षाप्रार्थकं सुशर्माणं व्यमोचयत्। गोरक्षणविजयेन आनन्दपरवशो विराटः स्वसंरक्षकं कङ्कुभट्टं राज्यप्रदानसम्मानेन प्रकटितानन्दो बभूव।
युधिष्ठिरआक्षानिबद्धाः सम्यन्व्रता किल शिष्टाः पाण्डवाः। तस्मादेव अज्ञातवास परिसमाप्तिं पाण्डवाग्रज एव प्रकरयेत् इति सञ्चिन्त्य विजयः गृह आगमनसमये उत्तरम् एवम् आदिदेश। "राजकुमार! भवान् एक एव विजयवार्तां पितरं श्रावय। अहं तदनन्तरं राजानं आत्मीयैः सह मिलामि" इति। अर्जुनाज्ञां शिरसा सन्धार्य उत्तरः गोगणैःसाकं राज्यं प्रविवेश।
अत्रान्तरे दक्षिणगोग्रहणात् अन्तःपुरमागतो विराटः उत्तरम् एकम् असहायं कौरवसैन्येन योद्धुं निर्गतं श्रुत्वा, सम्भ्रान्तः सोत्कंठश्च अभूत्। तत्र स्थितः युधिष्ठिरः "महाराज! बृहन्नलायुक्तं कुमारं प्रति मा भैषीः। सः विजयः (विजयं सम्साध्यः) अस्मिन् क्षणे एव भवन्तं मिलति" इत्यवोचत्। तत् वाक्यं सत्यापयन् / सत्यं कुर्वन् वार्ताहराः सवेगम् आगत्य उत्तरगोग्रहणविजयवार्ताम् श्रावयामासुः। (उत्तरः शनैः आगच्छति इति भावः)। उत्तर विजय / पुत्रविजय पुलकितः राजा राजधानीं सालङ्कृतं कर्तुम् आज्ञाप्य मित्रेण कङ्कुभट्टुना आगमन सूचकं क्रीडितुम् अक्षयसंसिद्धो बभूव। पुनः पुनः कुमारं प्रशंसन् राजा, "बृहन्नला सहितस्य नकिमपि तत्राश्चर्यं विजयसाधने" इति कङ्कुभट्टश्च अन्योन्यं समूचुः। पौनःपुन्यं कुमारविजयं न्यूनी कुर्वन्तं भट्टं कुपितो राजा अक्षैः मुखे अहरत्।

ततः प्रकुपितो राजा तमक्षेणाहनद् भृशम्।
मुखे युधिष्ठिरं कोपान्नैवमित्येव भर्त्सयन्।। 68.46 श्लो

सर्वैरपि अन्तिमक्षण पर्यन्तम् अज्ञातवासदीक्षा सुनिपुणं पालयितव्या इति आज्ञाप्य अपि, स एव धर्मजः सकलकौरवविजयवार्ताम् अनुजकृतां संश्राव्य आनन्दम् निह्नोतुं न शक्नोति स्म। भीष्मादीनाम् अपजयः, कर्णसुयोधनादीनां पराभवः तस्य महानन्दकारणम् आशीदिति सम्भाव्यम्। अक्षप्रहारेण नाशिकातः श्रवन्तम् रक्तं यदृच्छया समीपस्थित सैरन्ध्री जलमानीय रक्तश्रावं निवारयति। अत्रान्तरे उत्तरः अन्तःपुरं प्रविवेश। बृहन्नला प्रवेशस्तु कङ्कभट्टुना निवारितः। यद्यर्जुनः विराटं रक्तश्रावकारकं जानाति, सः अपगतप्राणो भविष्यति। तादृशी अर्जुनप्रतिज्ञ जानन् युधिष्ठिरः प्रथममेव जागरूकः सन् उत्तरेण साकं अर्जुनं न प्रवेशयति।

> धर्मजस्य क्षमागुणः अज्ञातवास आवासदातारं विराटं ररक्ष।

तत्रैव उत्तरप्रार्थितः राजा कङ्कभट्टुं क्षमाम् अर्थयति। प्रसन्नश्च भट्टुः, "राजन्! मे क्षमा यज्ञायिता साधिता। यदि तम् रक्तं नासातः भूमौ पतति, त्वं, त्व राज्यं च विनश्यति। किन्तु भवान् मे मित्रं। तस्मात् त्वं भवन्तम् अहं कोपपात्रं न करोमि।"

> यदि ह्येतत् पतेत् भूमौ रुधिरं मम नस्ततः।
> सराष्ट्रस्त्वं महाराज विनश्येथा न संशयः।। 68.64 श्लो

एवं क्षमाभूषणः धर्मजः आश्चर्यदातारं विराटं संरक्षन् अभिमन्योः वधूदातारं च अकरोत् अर्जुनानुमत्य। विवाहन्तं शुभानन्दप्रदं विराटपर्वं महाभारतप्रवचनेषु पौराणिकैः सगौरवं सम्भावितं आसीत् साम्प्रदायकैः तत्वज्ञैः।
(अस्मत् पितामहः चतुश्शास्त्रपण्डितः, "विद्याचुर्दशापादक" पदाञ्चितस्य मुल्लपूडि नारायण शास्त्रिवर्यः पोन्नूरुपुरवासकाले, उपाध्यायवृत्तिम् आश्रित्य निवसन् रात्रिषु संस्कृत महाभारतम् आधारीकृत्य आन्ध्रियां समग्रम् अमुम् इतिहासं पुराणप्रवचनम् अकरोत् इति धन्योयम् अस्मद्वंशः। तस्मिन् समये विराटपर्वतः एव पुराणप्रवचनम् आरब्धम्। धन्यास्ते तन्नगरवासिनः एतत् श्रवणाभिलाषिणः प्ररोचकाश्च वैश्यवर्याः।)

**संदर्भसूची**

1. श्री वेद्व्यासमहर्षि विरचित
2. महाभारतम् – द्वितीय खण्डम्
3. हिन्दी अनुवादकः पण्डित रामनारायणदत्त शास्त्री
4. गोरख् पूर् , गीता प्रेस्.